अध्यायः ८

# विविधतायाम् एकता, ‘एकस्मिन् बहुभावः’ वा

हे भगवन्, प्रार्थये त्वां यथा, बहूनां विविधक्रीडासु अपि, तस्यैकस्य स्पर्शानन्दम् सततमनुभवामि।

- रवीन्द्रनाथ ठाकुरः

... विविधतायामपि एकतायाः अनुभवः, यद् [भारतस्य] कृते सर्वदा स्वाभाविकमासीत्, तथा च यस्य परिपूर्णता भारतीयसत्तायाः, तस्य प्रकृतेः मूलभूतः भागः अस्ति, ‘एकस्मिन् बहुत्वस्य’ तया एव भावनया भारतं तस्य स्वभावस्य स्वधर्मस्य च दृढभित्तौ पुनः प्रतिष्ठितं भविष्यति।

- श्री अरविन्दः



## महत्त्वपूर्णाः प्रश्नाः ?

१. भारतीयपरिदृश्ये ‘विविधतायाम् एकता’ इति कथनस्य किं तात्पर्यम् ?

२. भारते विविधतायाः के के पक्षाः अत्यन्तं महत्त्वपूर्णाः सन्ति ?

३. विविधतायाम् अन्तर्निहितस्य ऐक्यस्य अन्वेषणं वयं कथं कुर्मः ?

0681CH08

© NCERT not to be republished

## एका समृद्धा विविधता

यदि भवन्तः भारतस्य कुत्रापि रेलयानेन भ्रमणं कुर्वन्ति तर्हि तत्र चलमानविचित्रदृश्यैः सह भिन्नभिन्नप्रकाराणाम् अनेकाः वेषभूषाः, अनेकानि भोजनानि अपि भवन्तः अवलोकयिष्यन्ति। परिचितानाम् अपरिचितानां च भाषाणां श्रवणं भविष्यति, तथा मार्गे विभिन्नप्रकाराणां लिपीः अपि भवन्तः द्रक्ष्यन्ति। एवं स्वप्रदेशस्य अन्तः अपि भवन्तः बहुधा भारतस्य विभिन्नप्रान्तस्य जनान् द्रष्टुं शक्नुवन्ति येषां भिन्नभिन्नसंस्कृतयः परम्पराश्च सन्ति। अस्य कारणं भवति भारतवर्षस्य समृद्धशालिवैचित्र्यम्। इदमेव मुख्यतया पर्यटकान् अस्माकं देशं प्रति आकर्षयति। चत्वारिंशदधिकैकशतकोटिभारतवासीनां विषये एतद् वैचित्र्यं स्वाभाविकमेव।

विंशशतकस्य अन्ते भारते मानवविज्ञानसर्वेक्षणम् इति राष्ट्रियसंस्थया देशस्य सर्वेषु राज्येषु ४६३५ समुदायानां मध्ये एकं व्यापकसर्वेक्षणं कृतम्। तस्याः परियोजनायाः 'पीपल ऑफ़ इण्डिया प्रजेक्ट' इति नाम आसीत्।

अस्मिन् पञ्चविंशत्यधिकत्रिशतभाषाः(३२५) पञ्चविंशतिलिपयश्च(२५) प्राप्यन्ते। तत्र एतदपि लक्षितं यत् बहवः भारतीयाः प्रवासीनः(माइग्रेन्टस्) सन्ति ,नाम ते जनाः स्वजन्मस्थानस्य समीपे वा स्वस्य मूलसमुदायेन सह वा न निवसन्ति इति।

### एहि, वयम् अन्विषामः



वर्गक्रियारूपेण, (१) न्यूनातिन्यूनं पञ्चसहपाठिनां जन्मस्थानानां, तेषां मातुः पितुश्च जन्मस्थानानां सूचीं कुर्वन्तु। (२) छात्राणां मातृभाषाणां, तथा अन्याश्च याः भाषाः ते जानन्ति, तासां सूचीं कुर्वन्तु। किञ्च विविधतायाः दृष्ट्या अस्य परिणामानां चर्चां कुर्वन्तु।

यद्यपि नानात्वं खलु सुन्दरं तथापि तस्य बोधः सहजं नास्ति। शताब्दीपूर्वं ब्रिटिशः इतिहासकारः विन्सेन्ट-स्मिथमहोदयः विस्मितः सन् एतदुक्तवान् आसीत् -

> "एतादृशाद्भुतविविधतायाः सम्मुखे कथं भारतस्य इतिहासः लिखितुं शक्यते ? भारते विविधतायामपि एकतायाः भावः अस्ति इत्यस्मिन् तथ्ये एव एतज्जिज्ञासायाः उत्तरमस्ति।

'वैचित्र्येषु ऐक्यम्' इति कथनेन किं बोध्यते? एकतायाः एतद्भावम्, 'एकस्मिन्नेव बहुत्वम्' इति भावं वा कथं वयं ज्ञातुं शक्नुमः, कथञ्च तद् व्यञ्जयितुं शक्नुमः। अस्य प्रश्नस्य समाधानार्थं वयं भारतीयजीवनस्य कतिपयानाम् आयामानाम् अन्वेषणं करिष्यामः।


© NCERT not to be republished

## समेषां कृते भोजनम्

भवत्सु केचन भारतस्य विभिन्नप्रान्तस्य भोजनं खादितवन्तः स्युः। अत्र भवन्तः यावद् विविधानि व्यञ्जनानि, खाद्यवस्तूनि च आस्वादयितुं शक्नुवन्ति, तेषां संख्या सहस्रं तु स्यादेव, लक्षं वा भवितुम् अर्हति !

तथापि कानिचन शस्यानि प्रायः देशस्य प्रत्येकस्मिन् भागे सामान्यरूपेण प्राप्यन्ते।

- धान्यशस्यानि यथा, तण्डुलः, यवः, गोधूमश्चेत्यादयः ; प्रियंगुः यथा, बाजरा, यवनालः, रागी इत्यादयः ; द्विदलम् यथा, नानाप्रकाराः दालाः चणकाश्च।




चित्रम् ८.१. - भारतस्य विभिन्नप्रदेशस्य धान्यशस्यानां द्विदलानां च कतिपयानि उदाहरणानि

© NCERT not to be republished

एतानि सर्वाणि 'मुख्यधान्यानि' इति उच्यन्ते यतो हि तानि अधिकांशभारतीयानां कृते मूलभूतानि भोजनानि भवन्ति (१२७ तमे पृष्ठे ८.१ इति चित्रे) । तथैव हरिद्रा, जीरकम्, एला, आर्द्रकम् इत्यादयः केचन उपस्कराः सामान्यरूपेण सम्पूर्णे देशे उपयुज्यन्ते। एवं सामान्यरूपेण उपलब्धाः केचन शाकाः, तैलाः इत्यादिभिः वयम् एतां सूचीम् अनुवर्तयितुं शक्नुमः।

अतः वयं पश्यामः यत् कथं समानानि वस्तूनि (एकता) भिन्नभिन्नरूपेण (विविधता) उपयुज्य असंख्यविविधव्यञ्जनानां निर्माणं कर्तुं शक्यते!

### एहि, वयम् अन्विषामः



- वर्गक्रियारूपेण, भवतां गृहे उपयुज्यमानानां सामग्रीनां सूचीं कुर्वन्तु। (धान्यानि, उपस्कराः इत्यादयः)।
- कमपि एकं शाकं स्वीकृत्य तेन भवन्तः कानि भिन्नभिन्नव्यञ्जनानि निर्मातुं शक्नुवन्ति इति चिन्तयन्तु।

## वस्त्राणि परिधानानि च



चित्रम् ८.२ । वैशालीतः (अधुना बिहारराज्ये) प्राप्तं एकं शिलोत्कीर्णनं यत्र एका स्त्री शाटिकां धृतवती अस्ति।

भारते प्रत्येकप्रदेशस्य समुदायस्य च वस्त्रनिर्माणस्य एवञ्च वेशभूषायाः स्वकीया शैली अस्ति। किन्तु तत्र उपादानभेदेऽपि केषुचित् पारम्परिक-भारतीय-परिधानेषु वयं समानतां लक्षयामः। अस्य एकं स्पष्टम् उदाहरणमस्ति शाटिका। सामान्यरूपेण एतदेकं साधारणं दीर्घवस्त्रम् भवति। भारतस्य अधिकांशक्षेत्रेषु वेशभूषायाः एकः भागः अस्ति शाटिका, या परिधानत्वेन उपयुज्यते। इयमधिकतया कार्पासेन क्षौमेन वा निर्मीयते। परन्तु अधुना कृत्रिमतन्तुनिर्मिताः शाटिकाः अपि सन्ति। बनारसी, काञ्चीवरम्, पैठणी, पटन् पटोला, मुगा अथवा मैसूरु इत्येताः प्रसिद्धाः क्षौम-शाटिकाः सन्ति। अन्ते बहुविधवर्णकद्रव्येभ्यः उत्पद्यमानानां वर्णानाम् अनन्तविविधताः सन्ति।

इतोऽपि अनेकप्रकाराः कार्पासनिर्मिताः शाटिकाः सन्ति। वस्तुतः शाटिका नाम एतस्य अनसितपटखण्डस्य शताधिकप्रकाराः भवन्ति।
विविधविन्यासेन, विविधविधया (दक्षिणभागे ८.३ इति चित्रम्) च एतासां निर्माणं भवति। तत्र केचन विन्यासाः वस्त्रस्य एव भागाः सन्ति, अन्ये तु वस्त्रवयनान्तरं मुद्रिताः भवन्ति। अपिन्ते च तत्र वर्णानामपि अनन्तविविधताः सन्ति, ये बहुविधेभ्यः रञ्जकद्रव्येभ्यः उत्पद्यन्ते।
शाटिकायाः दीर्घः इतिहासः अस्ति। वैशालीतः (अधुना बिहारराज्ये) प्राप्तम् एतत् शीलोत्कीर्णनं ख्रीस्टस्य (१२८ तमे पृष्ठे ८.२ इति चित्रम्) कतिपयशताब्दपूर्वम् अस्ति।



चित्रम् ८.३. विविधवर्णानां पारम्परिकभारतीयवस्त्राणां कानिचन प्रतिरूपाणि।

## एहि, वयम् अन्विषामः

शाटिका इत्यस्याः उदाहरणे कथम् एकतायाः विविधतायाश्च भावः एकत्र प्रतिफलितः भवति, तद् व्याख्यातव्यम् (शतशब्देषु पञ्चाशदधिकैकशतशब्देषु वा)।

## मा विस्मरन्तु

बहुकालं यावत्, भारतेन विश्वस्य अत्युत्तमकार्पासस्य उत्पादनं कृतमासीत्, भारतीयवस्त्राणां च यूरोप्-देशपर्यन्तं निर्यातः अभवत्। सप्तदशशताब्द्यां 'चिन्ट्ज' (कलमकारी) इति एकः सुन्दरः प्रकारः मुद्रितकर्पासः यूरोप्-देशे एतावान् लोकप्रियः अभवत् यत् केषाञ्चन यूरोपीयवस्त्राणां विक्रयणं तीव्ररूपेण न्यूनम् अभवत्। अन्ततो गत्वा स्वोत्पादानां रक्षणार्थं इङ्ग्लेण्ड्-देशः, फ्रान्स्-देशश्च भारतात् चिण्ट्ज़्-इत्यस्य आयातं प्रतिषेद्धुं निश्चितवन्तौ!

**उत्कीर्णनम् :** फलकस्य पृष्ठतः विशिष्टः विन्यासः (यत् पाषाणस्य, काष्ठस्य, सेरमिक इत्यस्य अन्यस्य कस्यापि पदार्थस्य वा उपरि भवितुं शक्यते)।

शाटिकाधारणस्य बहवः प्रकाराः सन्ति। प्रदेशभेदेन समुदायभेदेन वा तत्र वैचित्र्यं दृश्यते। वस्तुतः अद्यापि तस्य नूतनाः उपायाः आविष्कृताः सन्ति। परन्तु मूलरूपेण एषा एकमेव वस्त्रम् अस्ति - शाटिका इति। विगतशतकेषु भारतं प्रति आगताः बहवः





चित्रम् ८.४. - महिलाभिः प्रायः परिधानमतिरिच्यापि अन्येषु प्रयोजनेषु शाटिकाः उपयुज्यन्ते। (दक्षिणभारतस्य चित्राणि)





पर्यटकाः तत्र परिधेयशाटिकायाः साधारणरूपं, तस्याः निर्माणव्ययं, तथा च तस्याः परिधानप्रकाराणि दृष्ट्वा विस्मिताः अभवन्। तदतिरिक्तं, महिलाभिः प्रायः वस्त्रम् अतिरिच्य अन्येषु कार्येषु अपि शाटिकाः उपयुज्यन्ते। उपरि ८.४ इति दृष्टान्ते षट् चित्राणि सन्ति, यानि कतिपयतादृशसृजनात्मकोपयोगान् दर्शयन्ति ।

## एहि, वयम् अन्विषामः



- → उपर्युक्तेषु चित्रेषु शाटिकाः किमर्थं प्रयुक्ताः सन्ति इति ज्ञातुं शक्नुवन्ति वा ?
- → किं भवन्तः शाटिकानाम् इतोऽपि अन्येषाम् उपयोगानां विषये जानन्ति? तद्विषये भवन्तः कल्पयितुं शक्नुवन्ति वा?










→ शाटिकायाः उदाहरणं अनुसृत्य, धोती इत्यस्य कृते भवता/भवत्याः दृष्टानां भिन्नभिन्नशैलीनां सूचीं कुर्वन्तु - उपादानपटस्य दृष्ट्या, तस्याः उपयोगदृष्ट्या च। अस्मिन् विषये भवतां किं सिद्धान्तम् अस्ति?

## अनेकोत्सवाः

भारते उत्सवानां अपारवैविध्यं वर्तते। भवद्भिः लक्षितं स्याद् यत् तत्र केचन सामान्योत्सवाः भवन्ति, येषां नामानि भिन्नानि सन्ति चेदपि प्रायः समकाले एव सम्पूर्णे भारते आचर्यन्ते। एकमेव उदाहरणं स्वीकुर्मः - मकरसंक्रान्तिः, या भारतस्य अनेकेषु भागेषु

शस्योत्पादनकालस्य आरम्भे उत्सवरूपेण आचर्यते जनवरीमासस्य चतुर्दशतमे दिनाङ्के वा प्रायः आचर्यते। इदं मानचित्रं सम्पूर्णे भारते प्रायः समानतिथौ आचरितानां समानोत्सवानां भिन्नानि नामानि दर्शयन्ति।




चित्रम् ८.५ । सम्पूर्णे भारते प्रायः समानतिथौ आचरितानां समानोत्सवानां भिन्नभिन्नानि नामानि

© NCERT not to be republished

## एहि, वयम् अन्विषामः



→ भवतः/भवत्याः प्रियः उत्सवः कः अस्ति तथा च भवतः/भवत्याः प्रदेशे तत् कथं आचर्यते? किं भवान्/भवती जानाति यत् भारतस्य अन्यस्मिन् भागे अपि सः उत्सवः कदाचित् भिन्ननाम्ना आचर्यते वा?

→ अक्टोबर-नवम्बरमासयोः भारतस्य विभिन्नस्थानेषु अनेके प्रमुखोत्सवाः भवन्ति। देशस्य विभिन्नप्रान्तेषु आचरितानां तादृशानां कतिपयप्रमुखोत्सवानां सूचीं कुर्वन्तु, तेषां भिन्नभिन्ननामानि लिखन्तु च।

## महाकाव्यमुखेन सांस्कृतिकः प्रसारः

विविधतायाम् एकतायाः अपरमेकं उत्तमदृष्टान्तमस्ति साहित्यम्। भारतीयसाहित्यम् अत्यन्तं वैचित्र्यमयम् (विश्वस्य उपलभ्यमानसाहित्येषु सर्वाधिकम्) अस्ति। बहुशताब्दिं यावद् भाषाणां कौशलानां भेदे सत्त्वेऽपि तानि स्वकीयान् महत्त्वपूर्णविचारान् मौलिकचिन्तनानि च परस्परं सहभागयन्ति। उदाहरणार्थं पञ्चतन्त्रस्य नाम को वा न श्रुतवान्? पशवः अत्र मुख्यपात्रत्वेन कल्पिताः सन्ति तथा तेषां माध्यमेन अयं मनोहरकथासङ्ग्रहः अस्मान् महत्त्वपूर्णजीवनकौशलानि शिक्षयति। मूलसंस्कृतग्रन्थः न्यूनातिन्यूनं २,२०० वर्षप्राचीनः अस्ति, परन्तु तस्य कथाः प्रायः प्रत्येकस्मिन् भारतीयभाषायां अनुदिताः सन्ति। वस्तुतः, ताः कथाः भारतात् बहिरपि बहुदूरं भ्रमणं कृत्वा दक्षिणपूर्व-एशियायाः देशेषु, अरब्-विश्वे, यूरोप्-देशे च प्रवासं कृतवन्तः। मार्गे ताभ्यः नूतनकथासङ्ग्रहाः अपि प्रेरणां प्राप्ताः - पञ्चतन्त्रस्य प्रायः द्विशतरूपान्तरणानि पञ्चाशदधिकासु भाषासु विद्यमानानि सन्ति इति अनुमीयते! - अनेन ज्ञायते यत् कथं 'एकः' कथासंग्रहः 'अनेकः' भवितुम् अर्हति।

अस्य सर्वोत्तमम् उदाहरणं भवति भारतस्य महाकाव्यद्वयम् — रामायणं महाभारतं च।

**महाकाव्यम्** - महाकाव्यं नाम तादृशं विशालकाव्यं यत्र अतीतस्य घटनाः वर्णिताः सन्ति। महाकाव्येषु सामान्यतया नायकानाम् अन्येषाञ्च महापुरुषाणां महत्कर्मणां कीर्तनं भवति।

एतयोः संस्कृतमहाकाव्ययोः मूलसंस्करणेषु प्रायः सप्तसहस्राणि पृष्ठानि भवितुं शक्नुवन्ति। द्वयमपि महाकाव्यं धर्मस्य पुनस्संस्थापनाय युद्धं कुर्वतां नायकानां कथाः वर्णयति। महाभारते पाण्डवाः, कृष्णस्य साहाय्येन, स्वस्य हृतराज्यस्य पुनरुद्धाराय स्वभ्रातृभिः कौरवैः सह युध्यन्ते। रामायणे, रामः स्वभ्रातुः लक्ष्मणस्य हनुमतः च साहाय्येन, रक्षपतिं रावणं पराजितवान्, यः रामचन्द्रस्य भार्यायाः सीतायाः अपहरणं कृतवाम् आसीत्। एतासु मूलकथासु बह्व्यः लघुकथाः सम्मिलिताः, याः जीवनमूल्यानाम् उपरि केन्द्रिताः सन्ति, तथा को धर्मः, को वा अधर्मः इति विषये निरन्तरं प्रश्नान् पृच्छन्ति।

© NCERT not to be republished



चित्रम् ८.६. रामायणस्य (१८ शताब्दी, हिमाचलप्रदेशः) एकस्य प्रमुखप्रकरणस्य चित्रम्।

## एहि, वयम् अन्विषामः

वर्गचर्चारूपेण, उपरि ८.६ इति दृष्टान्ते दर्शितचित्रे चित्रितं प्रकरणं, तेन सह सम्बद्धानि महत्त्वपूर्णविवरणानि च चिन्तयितुं प्रयतन्ताम्।

द्विसहस्राब्देभ्यः अपि अधिककालात्, एतौ महाकाव्यौ भारते तथा बहिर्विश्वे प्रादेशिकेषु साहित्येषु अनुदितौ वा रूपान्तरितौ वा स्तः। एतदतिरिच्य तेषां अगणितानि लोकसंस्करणान्यपि सन्ति। कतिपयेभ्यो वर्षेभ्यः प्राक्, कश्चन विद्वान् केवलं तमिळुनाडुराज्ये एव सर्वेक्षणं कृत्वा "[महाभारतस्य] प्रायः शतानि संस्करणानि प्राप्तवान्, यानि अस्माकं समीपे अधुना लोककथारूपेण सन्ति।" तर्हि कल्पयन्तु समग्रभारतस्य कृते एषा संख्या का भवितुम् अर्हति!

वस्तुतः, अनेकेषां समुदायानां रामायण-महाभारतयोः स्वकीयानि संस्करणानि सन्ति। एतैः महाकाव्यैः सह तैः स्वस्य इतिहाससम्बद्धाः आख्यायिकाः अपि संरक्षिताः सन्ति। विशेषतः भारतस्य अनेकेषु भागेषु आदिवासीसमुदायानां विषये एतत् सत्यम् अस्ति,

यथा भिलः, गोण्डः, थेमण्डास् इत्यादयः अन्ये अपि।

भारतस्य उत्तर-पूर्व-प्रदेशस्य, काश्मीरसहितस्य हिमालयप्रान्तस्य च अधिकांशजनजातीनां रामायणस्य महाभारतस्य वा उभययोः वा स्वकीयानि संस्करणानि सन्ति। एतानि जनजातीयरूपान्तरणानि मौखिकरूपेण प्रसारितानि सन्ति। अपि च रामायण-महाभारतयोः नायकाः (सामान्यतया पञ्चपाण्डवेषु कश्चिद् द्रौपदीसहितं सर्वे वा, परन्तु कदाचित् तेषां भ्राता, प्रतिद्वन्द्वी दुर्योधनः अपि) तत्तज्जनजातीयप्रदेशान् कथं गतवन्तः इति तस्य कथाः अपि तत्र योजिताः सन्ति।



चित्रम् ८.७. 'पञ्चा पाणवर'

तमिलनाडुनगरस्य नीलगिरीवने पञ्च पाणवभ्रातृणां चित्रं उत्कीर्णं शिला । अस्य शिलायुक्तं तीर्थं पाणवानां गमनस्य स्मरणार्थं इरुला आदिवासीभिः परिपाल्यते।

मानवशास्त्रविदः के.एस्. सिङ्गवर्यः पीपल्स्-आफ़्-इण्डिया इति परियोजनायाः निर्देशनं कृतवान्, यस्य उल्लेखः अस्माभिः पूर्वं कृतः (षड्विंशत्युत्तर-एकशततमं (१२६) पत्रं पश्यन्तु)। महाभारतस्य विषये सः अवदत्, "देशे कदाचित् एव तादृशम् एकं स्थानं स्यात् यत्र पाण्डवसदृशमहाकाव्यनायकाः लोककथानुसारं न गतवन्तः।" इति। रामायणस्य विषये अपि तथैव वक्तुं शक्यते। बहुशताब्दीं यावत्, अन्येषां ग्रन्थाणाम् अपेक्षया अधिकतया, एतौ महाकाव्यौ सम्पूर्णे भारते एशिया-महाद्वीपस्य अनेकेषु भागेषु च सांस्कृतिक-संवादस्य गहनजालं निर्मितवन्तौ। एतद् विविधतायाम् एकतायाः अपरम् उदाहरणमस्ति।

अस्य अध्यायस्य विषयस्य अधिकव्याख्यानार्थं वयं स्वपर्यवेक्षणम् अग्रे प्रसारयित्वा भारतीयसंस्कृतेः अधिकाधिकपक्षान् विचारयितुं शक्नुमः। यथा, वास्तुकलासहित-पारम्परिक-भारतीय-कलासु, विविधता, एकता चेति द्वयोः भावः सहजतया लक्ष्यते। (भवन्तः कलापाठ्यक्रमक्षेत्रस्य माध्यमेन एतेषां विषयाणाम् अध्ययनं करिष्यन्ति।)

अन्ते अस्माभिः स्मर्तव्यं यत् भारतीयसंस्कृतिः विविधतां समृद्धिरूपेण आचरति, किन्तु तस्यां विविधतायाम् अन्तर्निहितं एकतां कदापि न त्यजति।



© NCERT not to be republished



## अग्रे गमनात् प्राग् ...

- भारतस्य प्राकृतिकदृश्येषु, जनेषु, भाषासु, वेषेषु, खाद्येषु, उत्सवेषु, रीतिषु च अपारविविध्यम् अस्ति।
- अनेकक्षेत्रेषु तद् वैविध्यं सुलभतया दृश्यते, परन्तु तत्र अन्तर्निहितम् ऐक्यमपि अस्ति।
- भारतस्य एकता विविधतायाः उत्सवम् आचरति यतो हि सा विविधता विभेदं न जनयति, अपि तु समृद्धिं सूचयति।

## प्रश्नाः, क्रियाकलापाः परियोजनाश्च

१. अध्यायस्य प्रारम्भे यद् उद्धरणद्वयं दत्तमासीत्, तस्य विषये वर्गचर्चां कुर्वन्तु।

२. अस्य पाठ्यपुस्तकस्य प्रारम्भिकपृष्ठेषु राष्ट्रगीतं तस्य अनुवादं च पठन्तु। भवन्तः कुत्र वैविध्यं पश्यन्ति? तत्र ऐक्यं कुत्र अस्ति? अस्मिन् विषये द्वौ वा त्रीणि वा परिच्छेदान् लिखन्तु।

३. पश्चात्तन्त्रात् काश्चन कथाः चिन्वन्तु। तेषाम् उपदेशः अद्यत्वे अपि कथम् उपयोगी अस्ति इति विषये चर्चां कुर्वन्तु। किं भवन्तः स्वप्रदेशस्य एतादृशीः कथाः जानन्ति?

४. स्वप्रदेशात् कतिपयलोककथाः सङ्गृह्य तेभ्यः प्राप्तोपदेशस्य विषये चर्चां कुर्वन्तु।

५. काचित् प्राचीना कथा कलारूपेण चित्रिता इति भवता/भवत्या दृष्टा वा? तत् काऽपि प्रतिमा, किमपि चित्रं, नृत्यकला, चलच्चित्रं वा भवितुमर्हति। सहपाठिभिः सह तस्य विषये चरेचां कुर्वन्तु।

६. भारतस्य प्रथमस्य प्रधानमन्त्रिणः जवाहर-लाल-नेहरूवर्यः स्वातन्त्र्यात् पूर्वं भारतस्य अनेकेषु भागेषु यदा भ्रमणम् अकुर्वन्, तदा इदम् उक्तवन्तः आसन्। तस्य विषये वर्गे चर्चां कुर्वन्तु -

> "सर्वत्र मया एका एव सांस्कृतिकपृष्ठभूमिः प्राप्ता यस्याः तेषां जीवने प्रबलः प्रभावः अभवत्। ... भारतस्य पुरातनानि महाकाव्यानि, रामायणं, महाभारतं तथा च अन्यानि पुस्तकानि, लोकप्रियानुवादानां उपाख्यानानां च माध्यमेन, जनसमूहेषु बहुप्रसिद्धाः आसन्। तेषु प्रत्येकं घटना, कथा, नीतिश्च जनमानसे उत्कीर्णा सती तस्मै निरन्तरं समृद्धिं सन्तुष्टिं च दत्तवती आसीत्। लोकप्रियानुवादेषु, परवाक्येषु च, तेषु प्रत्येकं घटना कथा च नैतिकता च लोकमनसि उत्कीर्णं भवति स्म, समृद्धिं च सामग्रीं च ददाति स्म तस्मै। अशिक्षिताः ग्रामजनाः शतशः श्लोकान् हृदयेन धारयन्ति स्म, तथा तेषां वार्तालापः तैः सन्दर्भैः पूर्णः आसीत्। अपि च ते कदाचित् कस्यापि प्राचीनमहाकाव्यस्य नीतिकथां प्रति निर्दिशति स्म।" इति।

not to be republished © NCERT